श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री उत्तमूर् वीरराघवाचार्यमहादेशिक प्रणीतम्

# ॥ श्रीहयग्रीवाभिगमनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहयग्रीवाभिगमनम् ॥

अनिरुद्धतनोर्जातमात्मभूक्लेशनाशनम्।
अभिगच्छामि लक्ष्मीशं हयग्रीववपुर्धरम्॥ 1 ॥

सूर्योऽधुना सरसिजानि विकास्य सर्वान्
उत्थापयन् निजकरैस्तिमिरं निरस्य।
अभ्युद्गतो धृतनवासनपुण्डरीकः
श्रीवाजिवक्त्र भगवंस्तव सुप्रभातम्॥ 2 ॥

वेधाः पुरस्तदनु तन्महिषी गिरीशो
वाचस्पतिः कविबुधौ च कलानिधिश्च।
देवर्षयश्च मिलिता गुरवः परे च
श्रीवाजिवक्त्र भगवंस्तव सुप्रभातम्॥ 3 ॥

अन्वेषणाय मधुकैटभयोः समुद्रे
वेदाऽऽहृतेश्च कृत आदृतसम्प्रचारौ।
ब्रह्मादिभक्तजनशीर्षपरिष्क्रियार्हौ
श्रीवाजिवक्त्र चरणौ शरणं प्रपद्ये॥ 4 ॥

श्रीमन् लक्ष्मीहयमुख विभो स्वीकुरुष्वार्चनं मे
श्रीमत् तेऽहं चरणकमलं संश्रयन् साधु याचे।
इन्दुस्यन्दाधिकशुभसुधासाररूपं त्वदीयं
रूपं चित्ते लसतु महितं सुन्दरं सेन्दिरं मे॥ 5 ॥

दत्त्वा वेदं द्रुतमथ मधुं कैटभञ्चास्य चोरौ
    हत्वा यस्त्वं निखिलभुवनस्रष्टृरक्षामतानीः।
श्रीमन् लक्ष्मीहयमुख विधेह्यद्भुतं तत्त्वबोधं
    क्षोभे प्राप्तेऽपि च बहुविधे प्रच्युतिर्यस्य न स्यात्॥ 6॥

यं त्वं लक्ष्मीहयमुख पुरा स्वर्गिणां कामकामैः
    आराध्यत्वं फलमपि दिशन् वेदतत्त्वार्थमन्यम्।
तेभ्योऽवोचः सकलवचसामुत्तमेऽर्थे पुमर्थे
    सर्वान्तरस्थे त्वयि भवतु मे पारमैकान्त्यनिष्ठा॥ 7॥

नानाबाह्येन्द्रियपरवशं वानरप्रायमेतत्
    चित्तं ध्यानं कथमिह ततो वाजिवक्त्र प्रसन्नः।
स्वच्छस्वादुप्रगुणसुभगव्योमगङ्गाप्रवाह -
    स्फीतोत्कर्षं हयमुख वचः सन्तनु श्रेष्ठतीर्थम्॥ 8॥

वैराग्यर्द्धौ विहितमनसां नैव देवान्तरार्चा
    मा भूदेषा क्वचिदनुमते सत्समृद्ध्यादिकेऽपि।
त्वय्यभ्यर्थ्यं भवति यदिदं श्रीहयग्रीव तस्मिन्
    निष्ठाभङ्गक्षपणनिपुणस्त्वं हिते चोदयेर्माम्॥ 9॥

सत्यं सत्यप्रभृति सुहितं पुष्पमाध्यात्मिकं यत्
    तेनैवार्चा तव हयमुख श्रीपते पूर्णतृप्त्यै।
यावद्रक्ष्यं भवति गृहिणो देहवद्दारपुत्रा -
    द्येतत्त्यागे त्वघमिति धिया तत्र युक्ते नियुङ्क्ष्व॥ 10॥

कैङ्कर्यं यत् तुरगवदन त्वत्त्वदीयप्रसत्त्यै
    भक्तेर्ज्ञानस्य च दृढभुवस्तत् परीवाहभूतम्।
ज्ञानं तन्मे वितनु कृपया दुष्कृतान्ताः कृतान्त -
    प्रीत्यै जाता भुवि बहुतता येन निर्मूलिताः स्युः॥ 11॥

त्वत्सारूप्यं सितहयमुख त्वत्स्नुषा प्राप्य पत्युः
जिह्वावासा जयति चतुरास्यश्च स त्वत्कृपातः।
पौत्रः शम्भुर्गिरिवरपतिर्दक्षिणामूर्तिरेवं
सर्वज्ञोऽभून्मयि च निखिलो बन्धुरेवं प्रसीद॥ **12** ॥

मधुसूदनवीक्षणावदाताः
इति तस्मिन् महिते निवेदयन्तः।
शुभधीगुणशीलवाग्विलासाः
सुखिनः स्युः स्वकरस्थपूरुषार्थाः॥ **13** ॥

आचार्यानयमिह रङ्गलक्ष्मणाख्यान्
अन्यानप्यनुदिवसं गतिं भजामि।
कारुण्यप्रसरणशीतभव्यरूपाः
क्षेमेप्सौ मयि निपतन्तु तत्तदीक्षाः॥ **14** ॥

वेगेन श्रितजनमादरेण सर्वाः
नेतुं यस्तुरगमुखो बभूव विद्याः।
देवं तं दलितविपक्षमात्मपक्षे
सत्पक्षं प्रणमनकर्म कर्तुमीहे॥ **15** ॥

वन्देऽहं हयवदनं दयापयोधिं
प्राप्तानां चरणयुगं प्रकामभोग्यम्।
देवानामपि फलदं दिवि प्रदीप्तं
दिव्यां नः कलयतु वत्सलः स विद्याम्॥ **16** ॥

व्याख्यामुद्राकोशशङ्खचक्रशोभिकराम्बुजम्।
पुण्डरीके निषण्णं श्रीश्रियं वाजिमुखं श्रये॥ **17** ॥

स्वच्छस्फटिकसङ्काशपुण्डरीकपरिष्कृतिः।
तुरङ्गवदनः श्रीमान् श्रेयसे भूयसेऽस्तु नः॥ **18** ॥

श्रीमन् वेङ्कटशैलनाथकृपया प्रज्ञासमासादन -
श्रद्धासंस्कृतचेतसः सहृदयान् नेतुं त्वदिष्टं भवान्।
आकण्ठं तुरगायते प्रथयिता वेगस्य विश्राणने
तादृक्षं कलये भवन्तमनिशं लिप्सुस्तदेव स्वयम्॥ **19**॥

हयवदननयननलिनप्र -
सारिकरुणाकटाक्षमालाभिः।
अङ्गीकृतो यथा स्यां
तथा कृपां वेङ्कटेश मयि धत्स्व॥ **20**॥

अनवधिकरुणासिन्धो
बन्धो मादृक्षदीनलोकानाम्।
अम्बुजलोचन कान्त
श्रियस्तुरङ्गास्य ते पदं शरणम्॥ **21**॥

कवितार्किकभूयिष्ठे सदसि प्रथितेऽपि मे।
प्रसीद भगवन् कुर्या जेतारं मां श्रियःपते॥ **22**॥

॥ इति श्रीहयग्रीवाभिगमनं समाप्तम्॥